শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ দ্ৱিষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ দ্ৱিষষ্টিতমঃ সর্গঃ ॥

## ৱানরৈর্মধুৱনরক্ষকাণাং দধিমুখস্য চ পরাভৱঃ সভৃত্যস্য দধিমুখস্য সুগ্রীৱপার্শ্ৱে গমনং চ

তানুৱাচ হরিশ্রেষ্ঠো হনূমান্ ৱানরর্ষভঃ।
অৱ্যগ্রমনসো যূযং মধু সেৱত ৱানরাঃ॥ **5.62.1** ॥

অহমাৱর্জযিষ্যামি যুষ্মাকং পরিপন্থিনঃ।
শ্রুৎৱা হনূমতো ৱাক্যং হরীণাং প্রৱরোঽঙ্গদঃ॥ **5.62.2** ॥

প্রত্যুৱাচ প্রসন্নাত্মা পিবন্তু হরযো মধু।
অৱশ্যং কৃতকার্যস্য ৱাক্যং হনুমতো মযা॥ **5.62.3** ॥

অকার্যমপি কর্তৱ্যং কিমঙ্গং পুনরীদৃশম্।
অঙ্গদস্য মুখাচ্ছ্রুৎৱা ৱচনং ৱানরর্ষভাঃ॥ **5.62.4** ॥

সাধু সাধ্ৱিতি সংহৃষ্টা ৱানরাঃ প্রত্যপূজযন্।
পূজযিৎৱাঙ্গদং সর্ৱে ৱানরা ৱানরর্ষভম্॥ **5.62.5** ॥

জগ্মুর্মধুৱনং যত্র নদীৱেগ ইৱ দ্রুমম্।
তে প্রৱিষ্টা মধুৱনং পালানাক্রম্য শক্তিতঃ॥ **5.62.6** ॥

অতিসর্গাচ্চ পটৱো দৃষ্টৱা শ্রুৎৱা চ মৈথিলীম্।
পপুঃ সর্ৱে মধু তদা রসৱৎ ফলমাদদুঃ॥ **5.62.7** ॥

উৎপত্য চ ততঃ সর্ৱে ৱনপালান্ সমাগতান্।
তে তাডযন্তঃ শতশঃ সক্তা মধুৱনে তদা॥ **5.62.8** ॥

মধূনি দ্রোণমাত্রাণি বাহুভিঃ পরিগৃহ্য তে।
পিবন্তি কপযঃ কেচিৎ সঙ্ঘশস্তত্র হৃষ্টৱৎ॥ **5.62.9**॥

ঘ্নন্তি স্ম সহিতাঃ সর্ৱে ভক্ষযন্তি তথাপরে।
কেচিৎ পীৎৱাপৱিধ্যন্তি মধূনি মধুপিঙ্গলাঃ॥ **5.62.10**॥

মধূচ্ছিষ্টেন কেচিচ্চ জঘ্নুরন্যোন্যমুৎকটাঃ।
অপরে ৱৃক্ষমূলেষু শাখা গৃহ্য ৱ্যৱস্থিতাঃ॥ **5.62.11**॥

অত্যর্থং চ মদগ্লানাঃ পর্ণান্যাস্তীর্য শেরতে।
উন্মত্তৱেগাঃ প্লৱগা মধুমত্তাশ্চ হৃষ্টৱৎ॥ **5.62.12**॥

ক্ষিপন্ত্যপি তদান্যোন্যং স্খলন্তি চ তথাপরে।
কেচিৎ ক্ষ্ৱেডান্ প্রকুর্ৱন্তি কেচিৎ কূজন্তি হৃষ্টৱৎ॥ **5.62.13**॥

হরযো মধুনা মত্তাঃ কেচিৎ সুপ্তা মহীতলে।
ধৃষ্টাঃ কেচিদ্ধসন্ত্যন্যে কেচিৎ কুর্ৱন্তি চেতরৎ॥ **5.62.14**॥

কৃৎৱা কেচিদ্ ৱদন্ত্যন্যে কেচিদ্ বুধ্যন্তি চেতরৎ।
যেঽপ্যত্র মধুপালাঃ স্যুঃ প্রেষ্যা দধিমুখস্য তু॥ **5.62.15**॥

তেঽপি তৈর্ৱানরৈর্ভীমৈঃ প্রতিষিদ্ধা দিশো গতাঃ।
জানুভিশ্চ প্রঘৃষ্টাশ্চ দেৱমার্গং চ দর্শিতাঃ॥ **5.62.16**॥

অব্রুৱন্ পরমোদ্বিগ্না গৎৱা দধিমুখং ৱচঃ।
হনূমতা দত্তৱরৈর্হতং মধুৱনং বলাৎ।
ৱযং চ জানুভির্ঘৃষ্টা দেৱমার্গং চ দর্শিতাঃ॥ **5.62.17**॥

তদা দধিমুখঃ ক্রুদ্ধো ৱনপস্তত্র ৱানরঃ।
হতং মধুৱনং শ্রুৎৱা সান্ত্ৱযামাস তান্ হরীন্॥ **5.62.18**॥

এতাগচ্ছত গচ্ছামো ৱানরানতিদর্পিতান্।
বলেনাৱারযিষ্যামি প্রভুঞ্জানান্ মধূত্তমম্॥ **5.62.19** ॥

শ্রুৎৱা দধিমুখস্যেদং ৱচনং ৱানরর্ষভাঃ।
পুনর্ৱীরা মধুৱনং তেনৈৱ সহিতা যযুঃ॥ **5.62.20** ॥

মধ্যে চৈষাং দধিমুখঃ সুপ্রগৃহ্য মহাতরুম্।
সমভ্যধাৱন্ ৱেগেন সর্ৱে তে চ প্লৱঙ্গমাঃ॥ **5.62.21** ॥

তে শিলাঃ পাদপাংশ্চৈৱ পাষাণামপি ৱানরাঃ।
গৃহীৎৱাভ্যাগমন্ ক্রুদ্ধা যত্র তে কপিকুঞ্জরাঃ॥ **5.62.22** ॥

বলান্নিৱারযন্তশ্চ আসেদুর্হরযো হরীন্।
সন্দষ্টৌষ্ঠপুটাঃ ক্রুদ্ধা ভর্ত্সযন্তো মুহুর্মুহুঃ॥ **5.62.23** ॥

অথ দৃষ্টৱা দধিমুখং ক্রুদ্ধং ৱানরপুঙ্গৱাঃ।
অভ্যধাৱন্ত ৱেগেন হনুমৎপ্রমুখাস্তদা॥ **5.62.24** ॥

সৱৃক্ষং তং মহাবাহুমাপতন্তং মহাবলম্।
ৱেগৱন্তং ৱিজগ্রাহ বাহুভ্যাং কুপিতোঽঙ্গদঃ॥ **5.62.25** ॥

মদান্ধো ন কৃপাং চক্রে আর্যকোঽযং মমেতি সঃ।
অথৈনং নিষ্পিপেষাশু ৱেগেন ৱসুধাতলে॥ **5.62.26** ॥

স ভগ্নবাহূরুমুখো ৱিহ্ৱলঃ শোণিতোক্ষিতঃ।
প্রমুমোহ মহাৱীরো মুহূর্তং কপিকুঞ্জরঃ॥ **5.62.27** ॥

স কথঞ্চিদ্ ৱিমুক্তস্তৈর্ৱানরৈর্ৱানরর্ষভঃ।
উৱাচৈকান্তমাগত্য স্বান্ ভৃত্যান্ সমুপাগতান্॥ **5.62.28** ॥

এতাগচ্ছত গচ্ছামো ভর্তা নো যত্র ৱানরঃ।
সুগ্রীৱো ৱিপুলগ্রীৱঃ সহ রামেণ তিষ্ঠতি॥ **5.62.29** ॥

সর্ৱং চৈৱাঙ্গদে দোষং শ্রাৱযিষ্যাম পার্থিৱে।
অমর্ষী ৱচনং শ্রুৎৱা ঘাতযিষ্যতি ৱানরান্॥ **5.62.30**॥

ইষ্টং মধুৱনং হ্যেতৎ সুগ্রীৱস্য মহাত্মনঃ।
পিতৃপৈতামহং দিৱ্যং দেৱৈরপি দুরাসদম্॥ **5.62.31**॥

স ৱানরানিমান্ সর্ৱান্ মধুলুব্ধান্ গতাযুষঃ।
ঘাতযিষ্যতি দণ্ডেন সুগ্রীৱঃ সসুহৃজ্জনান্॥ **5.62.32**॥

ৱধ্যা হ্যেতে দুরাত্মানো নৃপাজ্ঞাপরিপন্থিনঃ।
অমর্ষপ্রভৱো রোষঃ সফলো মে ভৱিষ্যতি॥ **5.62.33**॥

এৱমুক্ত্বা দধিমুখো ৱনপালান্ মহাবলঃ।
জগাম সহসোৎপত্য ৱনপালৈঃ সমন্ৱিতঃ॥ **5.62.34**॥

নিমেষান্তরমাত্রেণ স হি প্রাপ্তো ৱনালযঃ।
সহস্রাংশুসুতো ধীমান্ সুগ্রীৱো যত্র ৱানরঃ॥ **5.62.35**॥

রামং চ লক্ষ্মণং চৈৱ দৃষ্টৱা সুগ্রীৱমেৱ চ।
সমপ্রতিষ্ঠাং জগতীমাকাশান্নিপপাত হ॥ **5.62.36**॥

স নিপত্য মহাৱীরঃ সর্ৱৈস্তৈঃ পরিৱারিতঃ।
হরির্দধিমুখঃ পালৈঃ পালানাং পরমেশ্ৱরঃ॥ **5.62.37**॥

স দীনৱদনো ভূৎৱা কৃৎৱা শিরসি চাঞ্জলিম্।
সুগ্রীৱস্যাশু তৌ মূর্ধ্না চরণৌ প্রত্যপীডযৎ॥ **5.62.38**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে দ্বিষষ্টিতমঃ সর্গঃ ॥